# संस्कृत-वार्ताः

दिनाङ्कः-15.11.2025 सायम् - 06:20

आदौ मुख्यवार्ताः

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य गुजरातस्य आदिवासिबहुल-नर्मदा-जनपदस्य डेडिया-पाडा-नगरे नवसप्ततिशतकोट्यधिकरूप्यकैः निर्मीयमाणानां परियोजनानाम् उद्घाटनं शिलान्यासञ्च अकरोत्।
- राष्ट्रमद्य जनजातीयगौरवदिवसम् आचरति। अनेन उत्सवेन देशस्य प्रगतौ जनजातीय समुदायस्य योगदानं संस्मर्यते।
- ह्यः गतरात्रौ जम्मू-कश्मीरस्य नौगाम-आरक्षि-स्थानके सञ्जाते विस्फोटे नवजनाः मृत्युमुपगताः द्वात्रिंशच्च व्रणिताः सञ्जाताः।
- शरसन्धानस्पर्धायाम् अंकिताभकतः भारतस्य प्रथमा महिला पारम्परिक-शरसन्धात्री संजाता।
- कोलकात्तायाः ईडनगार्डन-क्रीडाङ्गणे दक्षिणाफ्रीकादलं भारतं विरुध्य प्रथम-निषक-क्रिकेट-प्रतिस्पर्धायाः द्वितीयदिने द्वितीयचक्रे सप्तक्रीडकाणां हानौ त्रिनवति-धावनाङ्कान् समर्ज्य क्रीडति।

---------------------------------------------------

**प्रधानमन्त्रिणः - गुर्जर-यात्रा**

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य मध्याह्ने गुजरातस्य आदिवासिबहुल-नर्मदा-जनपदस्य डेडियापाडा-नगरे नवसप्तति-शतकोट्यधिक-रूप्यकैः निर्मीयमाणानां परियोजनानाम् उद्घाटनं शिलान्यासञ्च अकरोत्। एताः परियोजनाः आधारभूतसंचनायाः स्वास्थ्यसेवानां च दृढीकरणार्थं वर्तन्ते, यासां माध्यमेन आदिवासि-सशक्ती-करणस्य विषये विशेषतः बलाघातः क्रियते। एतासां परियोजनानां शिलान्यासः जनजातीय-गौरव-दिवसावसरे कृतः, तत्र च विशिष्टस्य आदिवासिनेतुः स्वतन्त्रतासेनानिनः च भगवतः बिरसामुण्डावर्यस्य सार्धैकशत-जन्म-जयन्त्युत्सवे क्रियते। उल्लेखनीयमस्ति यत् प्रधानमन्त्री श्रीनरेन्द्रमोदी भगवतः बिरसा-

मुण्डावर्यस्य जयन्त्यवसरे आयोजितां सभां सम्बोधयन् उपर्युक्ततथ्यानि प्राकटयत् श्रीमोदी इदमपि प्रोक्तवान् यत् जनजातीयगौरवं सहस्राधिकवर्षेभ्यः भारतीयचेतनायाः अभिन्नाङ्गत्वेन वर्तते। आदिवासि-समाजस्य च स्वतन्त्रतासंग्रामे महत्त्वपूर्णं योगदानं न कदापि विस्मर्तुं शक्यते।

इतः पूर्वं प्रधानमन्त्री श्रीमोदी मुम्बयि-अहमदाबाद-हाई-स्पीड रेलकोरिडोर- इत्यस्य प्रगतेः समीक्षणार्थं गुजरातराज्यस्य सूरते निर्माणाधीन-बुलेट-रेलयान-स्थानकस्य भ्रमणम् अकरोत्। श्रीमोदिना तत्रत्याधिकारिभिः सहापि वार्तालापः कृतः अथ च कार्याणां समीक्षा विहिता। इदं हि विशिष्ट-रेलवे-कोरिडोर साबरमती-अहमदाबाद-आणंद-बडोदरा-भरूच-सूरत-बिलिमोरा-वापी-बोईसर-विरार-ठाणे-मुम्बयिसहितानि प्रमुखनगराणि परस्परं संयोजिष्यति, इदं च कार्यं भारतीय-परिवहनस्य आधारभूतसंचनार्थं विशिष्ट-परिवर्तन-कारि-पदक्रमत्वेन वर्तते। यदा हि विशिष्टबुलेटरेलमार्गः कार्यारम्भं करिष्यति तदा मुम्बयिं महानगरम्-अहमदाबादं चान्तरा गमनकालं होराद्वयं यावत् न्यूनीकरिष्यति, अनया परियोजनया वाणिज्य-पर्यटन-आर्थिक-गतिविधयश्चापि वर्धिष्यन्ते अथ च क्षेत्रीयविकासोपि द्रुतगत्या भविष्यति। अवधेयं यत् श्रीमोदिना सागबारा-तालुकायाः देवमोगराग्रामे आदिवासिजनसमुदायस्य कुलदेव्याः पंडोरीमातृमन्दिरे पूजनम् अर्चनं चापि कृतम्।

---

## जनजातीयगौरवदिवसः

राष्ट्रमद्य जनजातीयगौरवदिवसम् आचरति। अयं हि दिवसः स्वतन्त्रतासेनानिनः आदिवासिनेतुः च भगवतः बिरसामुण्डावर्यस्य सार्धैकशतजयन्त्युपलक्ष्ये आचर्यते, केन्द्रसर्वकारः अमूं दिवसं आदिवासिनाम् इतिहासस्य पुनर्जीवनार्थं अथ च एतस्य महत्त्वं स्वीकुर्वन् नबम्बरमासस्य पंचदशदिनाङ्के जनजातीयगौरवदिवसरूपेण आचरति, नैकवर्षेभ्यः अयम् उत्सवः जनजातीयगौरवसप्ताहत्वेन आयोज्यते स्म, अयं हि उत्सवः विभिन्नेषु मन्त्रालयेषु राज्येषु च सांस्कृतिककार्यक्रमैः विविधशैक्षिकगतिविधिपुरस्सरं आचर्यते, एतैः कार्यक्रमैः वयं आदिवासिनायकानां न्यासं रिक्तं च सजीवं कुर्मः।

---

गृहमन्त्री-बिरसामुण्डा

गृहमन्त्री अमितशाहः अद्य भगवतः बिरसामुण्डावर्यस्य सार्धैकशतजयन्त्यवसरे तस्मै पुष्पांजलिम् अर्पितवान्। सामाजिकसूचनातंन्त्रेण श्रीशाहेन प्रोक्तं यत् बिरसामुण्डा न केवलं जनजातीयसमाजस्य अपितु सम्पूर्णदेशस्य गौरवास्पदं वर्तते। गृहमन्त्रिणा कथितं यत् आदेशम् अद्य जनजातीयगौरवदिवसः आचर्यते। राष्ट्रस्वाधीनतान्दोलनाय मातृभूमेः च रक्षणार्थं तस्य अखण्डसंकल्पस्य कृते सः प्रणम्यते।

---------------------------------------------------

जम्मू-कश्मीरस्य नौगाम

गतरात्रौ जम्मू-काश्मीरस्य नौगाम-आरक्षिस्थानके सञ्जाते विस्फोटे नवजनाः मृत्युमुपगताः। जम्मू-कश्मीरस्य आरक्षि-प्रमुखः नलिनप्रभातः प्रोक्तवान् यत् मृतकेषु राज्यस्य अन्वेषण-संस्थायाः एकः कार्मिकः सघन विज्ञान-प्रयोगशाला-दलस्य त्रयः कर्मचारिणः, द्वौ अपराध-दृश्यांकनकारौ , न्यायाधीश-दले समाविष्टौ, द्वौ राजस्व-अधिकारिणोः समेत्य एकः सौचिकः सम्मिलितो वर्त्तते। नवदेहल्यां वार्ताहरान् संबोधयन् जम्मू-कश्मीर-विभागस्य संयुक्त-सचिवः प्रशांत-लोखंडे प्रोक्तवान् यत् एकस्य आतंकिनः घटनायाः अन्वेषणावधौ विस्फोटोयं सञ्जातः। सः अवदत् यत् विस्फोटक-पदार्थाः आरक्षि-स्थानकस्य मुक्तक्षेत्रे सुरक्षितरूपेण स्थापिताः आसन्। अपि च सघन-न्यायिकपरीक्षायै संसाधिताः आसन् ।श्री लोखंडे अवदत् यत् आरक्षि-स्थानक-भवनं समेत्य परितः कानिचन भवनानि क्षतिग्रस्तानि जातानि। सः अवदत् यत् दुर्घटनायाः कारणानां अन्वेषणं प्रचलति।

---------------------------------------------------

बिहार-भाजपाध्यक्ष

बिहारभाजपाध्यक्षः दिलीपजायसवालः अवदत् यत् विधानसभानिर्वाचने एनडीए-दलस्य प्रचण्डजयानन्तरं दलीयं केन्द्रीयनेतृत्वं शीघ्रमेव सर्वकारस्य संघटनं आश्रित्य सर्वेषु पक्षेषु विचारणां विधाय अन्तिमरूपेण निर्णेष्यति। तेन कथितं यत् आगिमिद्वयोः दिनयोः सर्वं निश्चितं भविष्यति, अथ च श्वः दलं बिहारस्य सर्वेषु जनपदेषु मतदातृणां आभारम् अभिव्यक्तीकर्तुं धन्यवादजनसंचलनयात्रां करिष्यति।

---------------------------------------------------

## शरसन्धानस्पर्धा

शरसन्धानस्पर्धायां अंकिताभकतः भारतस्य प्रथमा महिला रिकर्व इत्युक्ते शास्त्राधारितशरसन्धात्री, संजाता ढाकामध्ये एशियायि-शरसन्धान-प्रतिस्पर्धायाम् ओलंपिकरजतपदकविजेतारं नाम सुह्योनं सप्त-त्रि इत्यङ्कैः पराजित्य वैयक्तिक-एशियाई-प्रतिस्पर्द्धा-विजेत्रीत्वेन संजाता। तत्र च धीरज-बोम्मादेवरा प्रथमः भारतीयपुरुषः संजातः यो हि शास्त्रीयशरसन्धाने वैयक्तिक-विजेतृत्वेन रिकार्ड इति पुस्तके स्वीयं नामोल्लेखं कारितवान्, अयं हि अन्तिमचक्रे राहुलाख्यं भारतीयस्पर्धालुं षड्-द्वि इति अन्तरालेन पराजित्य स्वर्णपदकम् अजयत्, अवधेयं यत् साम्प्रतं यावत् जातासु स्पर्धासु भारतीयशरसन्धातृणां अयं सर्वश्रेष्ठं प्रदर्शनं वर्तते।

---------------------------------------------------

## क्रिकेट -

कोलकात्तायाः ईडनगार्डन-क्रीडाङ्गणे दक्षिणाफ्रीकादलं भारतं विरुध्य प्रथम-निषक-क्रिकेट-स्पर्धायाः द्वितीयदिने द्वितीयचक्रे त्रिनवति-धावनाङ्कान् समर्ज्य सप्तक्रीडकाणां हानौ आसीत्, तत्र च टेम्बाबबुमा एकोनत्रिंशत् धावनाङ्केषु कार्बिनबाशश्च एकधावनाङ्के क्रीडति स्म, दक्षिणाफ्रीका त्रिषष्टि-धावनाङ्कैः अग्रेसरं वर्तते, इतः पूर्वमद्य भारतीयदलं एकोननवत्यधिकशतं अङ्केषु समाप्तिमकरोत्, के.एलराहुलः भारताय एकोनत्रिंशत् इति सर्वाधिकधावनाङ्कान् समर्जयत्, वाशिंगटनसुन्दरश्च एकोनत्रिंशत् अंकान् समर्जितवान्।

।। इति वार्ताः ।।